# The Ashokavadana

# અશોકવન

## Document Information

Text title : ashokavana

File name : ashoka.itx

Category : misc

Location : doc_z_misc_misc

Latest update : October 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2022

*sanskritdocuments.org*

# અશોકવન

પાંશુપ્રદાનાવદાનં
યો અસૌ સ્વમાંસતનુભિર્ યજનાનિ કૃત્વા
અતપ્યચ્ચિરં કરુણાય જગતો હિતાય ।
તસ્ય શ્રમસ્ય સફલીકરણાય સન્તઃ
સાઽવર્જિતં શ્ૃણુત સાંપ્રતભાષ્યમાણમ્ ॥

એવં મયા શ્રુતં એકસ્મિન્ સમયે ભગવાન્
શ્રાવસ્ત્યાં વિહરતિ ।
ઇતિ સૂત્રં વક્તવ્યમ્ ।
અત્ર તાવદ્-
ભગવત્તથાગતવદનામ્ભોધરવિવરપ્રત્યુદ્ગત
વચનસરત્સલિલધારાસમ્પાતાપનીતરાગદ્વેષ
મોહમદમાનમાયાશાઠ્યપઙ્કપટલાનાં
શબ્દન્યાયાઽદિતર્કશાસ્ત્રાર્થાવલોકનૌત્પન્ન
પ્રજ્ઞાપ્રદીપપ્રોત્સારિતકુશાસ્ત્રદર્શનાન્ધ
કારાણાં
સંસારતૃષ્ણાછેદિપ્રવરસદ્ધર્મપયઃપાન
શૌણ્ડાનાં ગુરૂણાં સંનિધૌ
સર્વાવિવાદકશ્રેષ્ઠં
(શક્રબ્રહ્મઈશાનયમવરુણકુવેરવાસવસોમ
આદિત્યાઽદિભિર્-
આ,શક્રબ્રહ્મઈશાનયમવરુણકુવેરવસવસોમ
આદિત્યાઽદિભિર્ ) અપ્યપ્રતિહતશાસનં
કન્દર્પદર્પાપમર્દનશૂરં મહાઽઽત્માનં
અતિમહર્દ્ધિકં સ્થવિરૌપગુપ્તં આરભ્ય કાઞ્ચિદ્-
એવ વિબુધજનમનઃપ્રસાદકરીં ધર્મ્યાં

કથાં સમનુસ્મરિષ્યામઃ ।
તત્ર તાવદ્ગુરુભિર્ અવહિતશ્રોત્રૈર્ ભવિતવ્યમ્ ।
ઉપગુપ્તૌપાખ્યાનં
એવં અનુશ્રૂયતે ।
યદા ભગવાન્ પરિનિર્વાણકાલસમયે
અપલાલનાગં વિનીય કુમ્ભકારીં ચણ્ડાલીં
ગોપાલીં ચ તેષાં મથુરાં અનુપ્રાપ્તઃ ।
તત્ર ભગવાન્ આયુષ્મન્તં આનન્દં આમન્ત્રયતે સ્મ ।
અસ્યાં આનન્દ મથુરાયાં મમ
વર્ષશતપરિનિર્વૃતસ્ય ગુપ્તો નામ ગાન્ધિકો
ભવિષ્યતિ ।
તસ્ય પુત્રો ભવિષ્યતિ ઉપગૌપ્તનામ  અલક્ષણકો
બુદ્ધો યો મમ વર્ષશતપરિનિર્વૃતસ્ય
બુદ્ધકાર્યં કરિષ્યતિ ।
તસ્ય  અવવાદેન બહવો ભિક્ષવઃ
સર્વક્લેશપ્રહાણાદર્હત્ત્વં સાક્ષાત્ કરિષ્યન્તિ
।
તે અષ્ટાદશહસ્તાં આયામેન દ્વાદશહસ્તાં
વિસ્તરેણ ચતુરઙ્ગુલમાત્રાભિઃ શલાકાભિશ્ચ
ગુહાં પૂરયિષ્યન્તિ ।
એષો અગ્રો મે આનન્દ શ્રાવકાણાં ભવિષ્યતિ
અવવાદકાનાં યદુત  ઉપગુપ્તો ભિક્ષુઃ ।
પશ્યસિ ત્વં આનન્દ દૂરતએ એવ
નીલનીલામ્બરરાજિમ્ ।
એવં ભદન્ત ।
એષ આનન્દ ઉરુમુણ્ડો નામ પર્વતઃ ।
અત્ર વર્ષશતપરિનિર્વૃતસ્ય તથાગતસ્ય
શાણકવાસી નામ ભિક્ષુર્ ભવિષ્યતિ ।
સો અત્ર ઉરુમુણ્ડપર્વતે વિહારં
પ્રતિષ્ઠાપયિષ્યતિ ।
ઉપગુપ્તં ચ પ્રવ્રાજયિષ્યતિ ।
મથુરાયાં આનન્દ નટો ભટશ્ચ દ્વૌ ભ્રાતરૌ

શ્રેષ્ઠિણૌ ભવિષ્યતઃ ।
તૌ  ઉરુમુણ્ડપર્વતે વિહારં પ્રતિષ્ઠાપયિષ્યતઃ
।
તસ્ય નટભટિકા  ઇતિ સંજ્ઞા ભવિષ્યતિ ।
એતદગ્રં મે આનન્દ ભવિષ્યતિ
શમથાનુકૂલાનાં શય્યાઽસનાનાં યદિદં
નટભટિકારણ્યાઽયતનમ્ ।
અથ  આયુશ્માન્ આનન્દો ભગવન્તં ઇદં અવોચત્ ।
આશ્ચર્યં ભદન્ત યદીદૃશં આયુષ્માન્ ઉપગુપ્તો
બહુજનહિતં કરિષ્યતિ ।
ભગવાન્ આહ ।
ન  આનન્દ એતર્હિ યથા  અતીતે અપ્યધ્વનિ તેન
વિનિપતિતશરીરેણ  અપ્યત્ર  એવ બહુજનહિતં
કૃતમ્ ।
ઉરુમુણ્ડપર્વતે ત્રયઃ પાર્શ્વાઃ ।
એકત્ર પ્રદેશે પઞ્ચ પ્રત્યેકબુદ્ધશતાનિ પ્રતિવસન્તિ
।
દ્વિતીયે પઞ્ચર્ષિશતાનિ ।
તૃતીયે પઞ્ચમર્કટશતાનિ ।
તત્ર યો અસૌ પઞ્ચાનાં મર્કટશતાનાં
યૂથપતિઃ સ તં યૂથં અપહાય યત્ર પાર્શ્વે
પઞ્ચ પ્રત્યેકબુદ્ધશતાનિ પ્રતિવસન્તિ તત્ર ગતઃ ।
તસ્ય તાન્ પ્રત્યેકબુદ્ધાન્ દૃષ્ટ્વા પ્રસાદો જાતઃ ।
સ તેષાં પ્રત્યેકબુદ્ધાનાં શીર્ણપર્ણાનિ
મૂલફલાનિ ચ  ઉપનામયતિ યદા ચ તે પર્યઙ્કેણ
ઉપવિષ્ટા ભવન્તિ સ વૃદ્ધાન્તે પ્રણામં કૃત્વા
યાવન્ નવાન્તં
ગત્વા પર્યઙ્કેણ  ઉપવિશતિ ।
યાવત્ તે પ્રત્યેકબુદ્ધાઃ પરિનિર્વૃતાઃ ।
સ તેષાં શીર્ણપર્ણાનિ મૂલફલાનિ ચ
ઉપનામયતિ ।
તે ન પ્રતિગૃહ્ણન્તિ ।

સ તેષાં ચીવરકર્ણિકાનિ  આકર્ષયતિ ।
પાદૌ ગૃહ્ણાતિ ।
યાવત્ સ મર્કટશ્ચિન્તયતિ ।
નિયતં એતે કાલગતા ભવિષ્યન્તિ ।
તતઃ સ મર્કટઃ શોચિત્વા પરિદેવિત્વા ચ દ્વિતીયં
પાર્શ્વં ગતો યત્ર પઞ્ચર્ષિશતાનિ પ્રતિવસન્તિ ।
તે ચ ઋષયઃ કેચિત્ કણ્ટકાપાશ્રયાઃ કેચિદ્-
ભસ્માપાશ્રયાઃ કેચિદૂર્ધ્વહસ્તાઃ કેચિત્
પઞ્ચાઽતપાવસ્થિતાઃ ।
સ તેષાં તેષાં ઈર્યાપથાન્ વિકોપયિતું આરબ્ધઃ ।
યે કણ્ટકાપાશ્રયાસ્તેષાં કણ્ટકાન્ ઉદ્ધરતિ ।
ભસ્માપાશ્રયાણાં ભસ્મ વિધુનોતિ ।
ઊર્ધ્વહસ્તાનાં અધો હસ્તં પાતયતિ ।
પઞ્ચાઽતપાવસ્થિતાનાં અગ્નિં અવકિરતિ ।
યદા ચ તૈર્ ઈર્યાપથો વિકોપિતો ભવતિ તદા સ
તેષાં અગ્રતઃ પર્યઙ્કું બધ્નાતિ ।
યાવત્ તૈર્ ઋષિભિર્ આચાર્યાય નિવેદિતમ્ ।
તેન  અપિ ચ  ઉક્તમ્ ।
પર્યઙ્કેણ તાવન્ નિષીદત ।
યાવત્ તાનિ પઞ્ચર્ષિશતાનિ પર્યઙ્કેણ
ઉપવિષ્ટાનિ ।
તે અનાચાર્યકા અનુપદેશકાઃ સપ્તત્રિંશદ્-
બોધિપક્ષાન્ ધર્માન્ આમુખીકૃત્ય પ્રત્યેકાં
બોધિં સાક્ષાત્ કૃતવન્તઃ ।
અથ તેષાં પ્રત્યેકબુદ્ધાનાં એતદભવદ્।
યત્ કિઞ્ચિદસ્માભિઃ શ્રેયો અવાપ્તં તત્ સર્વં
ઇમં મર્કટં આગમ્ય ।
તૈર્ યાવત્ સ મર્કટઃ ફલમૂલૈઃ પરિપાલિતઃ ।
કાલગતસ્ય ચ તચ્છરીરં ગન્ધકાષ્ઠૈર્-
ધ્માપિતમ્ ।
તત્ કિં મન્યસે  આનન્દ યો અસૌ પઞ્ચાનાં
મર્કટશતાનાં યૂથપતિઃ સ એષ ઉપગુપ્તઃ ।

તદા અપિ તેન વિનિપતિતશરીરેણ અપ્યત્ર એવ
ઉરુમુણ્ડપર્વતે બહુજનહિતં કૃતમ્ ।
અનાગતે અપ્યધ્વનિ વર્ષશતપરિનિર્વૃતસ્ય મમ
અત્ર એવ ઉરુમુણ્ડપર્વતે બહુજનહિતં કરિષ્યતિ
।
તચ્ચ યથા એવં તથા ઉપદર્શયિષ્યામઃ ।
શાણકવાસ્ય્-ઉપાખ્યાનં
યદા સ્થવિરેણ શાણકવાસિના ઉરુમુણ્ડે પર્વતે
વિહારઃ પ્રતિષ્ઠાપિતઃ સમન્વાહરતિ ।
કિં અસૌ ગાન્ધિક ઉત્પન્નઃ ।
અથ અદ્ય અપિ ન ઉત્પદ્યતએ ઇતિ ।
પશ્યત્યુત્પન્નઃ ।
સ યાવત્ સમન્વાહરતિ ।
યો અસૌ તસ્ય પુત્ર ઉપગુપ્તો નામ્ના અલક્ષણકો
બુદ્ધો નિર્દિષ્ટો યો મમ વર્ષશતપરિનિર્વૃતસ્ય
બુદ્ધકાર્યં કરિષ્યતિ ઇતિ કિં અસાવુત્પન્નઃ ।
અથ અદ્ય અપિ ન ઉત્પદ્યતએ ઇતિ ।
પશ્યત્યદ્ય અપિ ન ઉત્પદ્યતે ।
તેન યાવદુપાયેન ગુપ્તો ગાન્ધિકો ભગવચ્છાસને
અભિપ્રસાદિતઃ ।
સ યદા અભિપ્રસન્નસ્તદા સ્થવિરઃ સંબહુલૈર્-
ભિક્ષુભિઃ સાર્ધં એકદિવસં તસ્ય ગૃહં
પ્રવિષ્ટઃ ।
અપરસ્મિન્નહનિ આત્મદ્વિતીયઃ ।
અન્યસ્મિન્નહનિ એકાકી ।
યાવદ્ગુપ્તો ગાન્ધિકઃ સ્થવિરં શાણકવાસિનં
એકાકિનં દૃષ્ટ્વા કથયતિ ।
ન ખલ્વાર્યસ્ય કશ્ચિત્ પશ્ચાચ્છ્રમણઃ ।
સ્થવિર ઉવાચ ।
જરાધર્માણાં કુતો અસ્માકં પશ્ચાચ્છ્રમણો
ભવતિ ।

*The Ashokavadana*

pdf was typeset on November 21, 2022

Please send corrections to *sanskrit@cheerful.com*